श्रीसदाशिवविरचितायाः पञ्चरत्नकारिकायाः समीक्षात्मकम् अध्ययनम् ।

कविकुलगुरु-कालिदास-संस्कृतविश्वविद्यालये दर्शनशास्त्रे **विद्यावारिधिः (Ph.D.)** इत्युपाधये

रचयिष्यमाणस्य शोधप्रबन्धस्य रूपरेखा

(RESEARCH PROPOSAL)

संशोधिका

श्रद्धा पराग देवपुजारी

मार्गदर्शकाः

आचार्य. सी. जी. विजयकुमारः

कुलपतिः

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः, उज्जयिनी, मध्यप्रदेशः

कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः

2021

अनुक्रमाणिका

अनुक्रमाङ्कः	**विषयः**
१.	प्रस्तावना
२.	विषयस्य अस्य चयने निदानम्
३.	पूर्वसंशोधनम्
४.	पञ्चरत्नकारिकाकारस्य सदाशिवयतेः परिचयः
५.	पञ्चरत्नकारिकाणां वैशिष्ट्यम्
६.	समीक्षात्मके अध्ययने समादृता पद्धतिः
७.	अस्य समीक्षात्मकस्य अध्ययनस्य प्रयोजनम्
८.	व्याप्तिः मर्यादा च
९.	शोधप्रबन्धस्य अध्यायविभागः
१०.	अनुशीलितग्रन्थसूची

१. प्रस्तावना -

यतः सर्वाणि भूतानि प्रतिभान्ति स्थितानि च।

यत्रैवोपशमं यान्ति तस्मै सत्यात्मने नमः॥

सुविदितं सर्वैः अस्माभिः यत् परमपुरुषार्थो मोक्षः इति। परमपुरुषार्थरूपस्य तस्य स्वरूपप्रतिपत्तये तत्प्राप्त्युपायबोधनाय च प्रवृत्तानि नैकविधानि दर्शनानि। तानि च आस्तिकनास्तिकभेदेन द्वैविध्यम् आपन्नानि इत्यपि प्रमितम् एव। तेषु दर्शनेषु आस्तिकानि एव उपादेयानि श्रेयस्कामैः। तत्रापि निःश्रेयसहेतुप्रतिपादकं वेदान्तदर्शनं सर्वातिशायिमहिमानम् आवहति। अत एव उक्तं बिन्दुटीकायां ब्रह्मानन्दस्वामिपादैः वेदान्तदर्शनमेव दर्शनीयतमम् इति। तत्र तावत् प्रत्यगभिन्नस्य ब्रह्मणः यथावत् स्वरूपाधिगमे उपनिषदः ब्रह्मसूत्राणि भगवद्गीता चेति मार्गत्रयं वरीवर्ति। आस्तिकैः तदेव प्रस्थानत्रयम् इति निगद्यते। तस्यास्य प्रस्थानत्रयस्य प्रसन्नं गम्भीरं च भाष्यं विरच्य लोकान् समस्तान् अन्वगृह्णन् आचार्यशङ्करभगवत्पादाः। किन्तु भाष्यस्यास्य गाम्भीर्यम् अधिगन्तुं शास्त्रान्तरपरिचयः सुतराम् अपेक्षितो भवति। अतः वेदान्तशास्त्रं प्रविविक्षूणां रुचिमतां , किन्तु शास्त्रपरिचयविधुराणाम् अस्मादृशानां बालानाम् अनायासेन वेदान्तार्थबोधाय नैकानि प्रकरणानि कालक्रमेण प्रणीतानि विपश्चित्तल्लजैः। किं नाम प्रकरणम् इति चेदुच्यते – शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तिरे स्थितम्। आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः॥ - इति।

तत्र तावत् लोकान् उद्धर्तुकामाः श्रीमच्छङ्करभगवत्पादाः अपि बहून् प्रकरणग्रन्थान् रचयामासुः। ब्रह्मसूत्रादीनां यत्र परमं तात्पर्यं , यत्साक्षाकारात् साक्षादेव संसारनिवृत्तिः परमानन्दावाप्तिश्च , तदेव ब्रह्मतत्त्वं विस्तरेण इह प्रकरणेषु उपपादयामासुः भगवत्पादाः। प्रतिप्रकरणं विशेषांश्च उपनिबबन्धुः ते। तत्रापि सोपानारोहणन्यायेन पुरुषार्थसाधनानि क्रमेण उपदिदिक्षुः पञ्चरत्नाख्ये प्रकरणे। अस्य पञ्चरत्ननामकस्य प्रकरणस्य उपदेशपञ्चकं सोपानपञ्चकं चेति नामान्तरं श्रूयते। इह प्रकरणे वेदो नित्यम्

अधीयताम् इति आरभ्य पञ्चभिः श्लोकैः चत्वारिंशत् विधयः उपदिश्यन्ते। प्रकरणस्यास्य कारिकाः सदाशिवेन प्रणीताः समुपलभ्यन्ते। एतत्समीक्षात्मकाध्ययनं तु कारिकाः इमाः उपजीव्य प्रवर्तते।

२. <u>विषयस्य अस्य चयने निदानम्</u> -

यद्यपि अहम् आधुनिकतन्त्रशास्त्रम् प्राधान्येन अधीतवती अस्मि , तथापि ईश्वरानुग्रहवशात् शास्त्राध्ययनस्य अवकाशो मया लब्धः। तत्रापि उद्ग्रन्थाधिगमे अनधिकारिण्यः मम बालानां सुखबोधाय प्रणीतानां स्वभावसरलानां शरीरेण लघूनाञ्च प्रकरणानाम् अध्ययने रुचिर्महती समुत्पन्ना। कालक्रमेण अवगतं यत् लघुनिबन्धानां सुललितानाम् अपि एतेषां गाम्भीर्यं गूढार्थत्वं च अस्ति महत् । अत एव प्रकरणग्रन्थव्याख्यानां परिशीलने आत्मानं व्यापारयामि स्म। तदवसरे विदितं यत् अस्ति किञ्चित् पञ्चरत्नाख्यं ग्रन्थरत्नं यत् कारिकावलीसंवलितं राराजते। तत्रत्या कारिकावली नूनम् शोभाम् अविदितपूर्वाम् आवहति। कारिकावल्याः अस्याः वार्तिकस्थानीयत्वमपि उपपादयितुं शक्यते इति मे भाति। अतः उक्तस्य अनुक्तस्य दुरुक्तस्य च चिन्तनं कारिकासु एतासु विहितम् अस्ति न वेति विचारणीयम्। तस्मात् एतद्विषये एव गहनम् अध्ययनं कर्तव्यम् इति विचारः अवर्तत। अनया दृष्ट्या यदा परिशीलनं समारब्धं तदा विज्ञातं यत् पञ्चरत्नस्य अस्य अन्यानि अपि व्याख्यानानि सन्ति यान्यपि अवश्यम् उपादेयानि आमूलचूलम् अध्येयानि च भवेयुः इति। तदनुसारेण पञ्चरत्नकारिकायाः समीक्षात्मकाध्ययनाय यत्नः प्रबन्धेऽस्मिन् विधास्यते।

३. <u>पूर्वसंशोधनम्</u> –

विषये अस्मिन् पूर्वसंशोधनम् एतावत्पर्यंतं न उपलब्धम् अस्ति। साधनपञ्चकम् अधिकृत्य तु शोधकार्यं कृतम् उपलभ्यते। तच्च वक्षमाण क्रमेण अस्ति।

१. “Shri Shankaracharya Sadhana Panchakam”, by Nagesh Sonde, New Age Publication.
२. “Upadesh Panchakam of Adi Shankaracharya”, Part I, II and III, by S. Yegnasubramaniyam.
३. “Sadhana Panchakam: A systematic text for aspirants of Spiritual Libaration”, A Thesis by K. Kathirasan, under the supervision of Prof. Narada Kush (Dutch University College).
४. “Sadhana Panchakam: The Rationale of Sadhana”, 24 talks by Swami Gurubhaktanand (Based on 25 Lectures of Swami Adwayanand).

४. पञ्चरत्नकारिकाकारस्य सदाशिवयतेः परिचयः -

सदाशिवस्य कालः 1750 – 1850 A.D. इति अद्वैतवेदान्तसाहित्येतिहासकोशे श्रीमद्भिः र. तङ्गस्वामिशर्मभिः उल्लिखितः अस्ति। रामेन्द्रस्वामिनं वन्दे सच्चिदानन्दविग्रहम् इति मङ्गलश्लोकम् अवलोक्य इदम् अवगम्यते यत् रामेन्द्रस्वामिपादानाम् अयं शिष्यः इति। प्रसिद्धात् सदाशिवब्रह्मेन्द्रात् अयं भिन्नः इत्यपि प्रतीयते। तत्र तावत् ग्रन्थकर्तुः सन्न्यासित्वे अस्ति विप्रतिपत्तिः अद्यत्वेऽपि। तथा हि – महामण्डलेश्वराः महेशानन्दगिरिस्वामिपादाः प्रतिपादयन्ति – Sadasiva seems to be a householder, though a realised soul, since he mentions Ramendra Sarasvati as the guru who gave him the knowledge of identity – इति। पारमार्थिकपरमहंसानां पादपङ्केरुहपरिचर्याप्रवणाः सच्चिदानन्दतीर्थयतयस्तु आहुः - प्रणेता चैतस्याः श्रीसदाशिवयतिरेव इति उन्नीयते। रामेन्द्रस्वामिनं वन्दे सच्चिदानन्दविग्रहम् इति मङ्गलश्लोके स्वगुरोः संन्यासित्वस्य स्फुटीकरणात् , असति बाधके स्वस्यापि यतित्वस्य सम्भावितत्वात् – इति। एवं च सदाशिवनामा अयं ब्रह्मचारी वा गृहस्थो वा संन्यासी वा इति इतोऽपि मृग्यमेव भवति।

५. पञ्चरत्नकारिकाणां वैशिष्ट्यम् -

श्रीमच्छङ्करभगवत्पादप्रणीतस्य पञ्चरत्ननाम्ना प्रथितस्य अस्य प्रकरणग्रन्थस्य निगूढार्थप्रकाशनपटीयसी इयं पञ्चरत्नकारिकावलिः। इयं तु सुललितपदविन्यासेन अलङ्कृता चकास्ति। कारिकाः इमाः गभीरविचारैः परिपूर्णाः सत्यः प्रकरणस्यास्य गाम्भीर्यं सुष्ठु अभिव्यञ्जयन्ति। सरला भावप्रकाशनचातुरी कारिकासु परिलक्ष्यते। कारिकावलिरियं पञ्चरत्नानां महीयसीं शोभां वर्धयन्ती अस्मादृशानां शास्त्रे बालानां महान्तम् उपकारम् आतनोति इति दृढा मे मतिः। इह तावत् प्रमेयनिरूपणाय यत्र शास्त्रान्तरप्रक्रियाः अनुसन्धेयाः भवन्ति , तत्र ताः अपि विमृष्टाः सन्ति। स्वपक्षस्थापनेन परपक्षनिराकरणेन च सिद्धान्ताः अत्र उपपादिताः वर्तन्ते। किञ्च परपक्षखण्डनावसरे न लक्ष्यते अभिनिवेशः ग्रन्थकर्तुः। अनुद्वेजकैः नातिसंक्षिप्तैः नातिविस्तृतैः पद्यकुसुमैः गुम्फितत्वात् अतिरमणीयेयं कारिकावलिः। एतद्ग्रन्थाध्ययनेन कतिचित् सिद्धान्तभेदाः सोपानक्रमेण अधिगताः भवन्ति इत्यत्र नास्ति संशीतिः। तस्मात् वेदान्तदर्शने व्युत्पित्सुभिः अस्माभिः छात्रैः अवश्यं परिशीलनीयाः इमाः पञ्चरत्नकारिकाः।

६. समीक्षात्मके अध्ययने समादृता पद्धतिः -

आचार्यात् पादामादत्ते पादं शिष्यः स्वमेधया। पादं सब्रह्मचारिभ्यः पादं कालक्रमेण हि॥ इति ज्ञानप्राप्त्युपायस्य अध्ययनस्य साम्प्रदायिकः क्रमः श्लोकेऽस्मिन् उपनिबद्धः अस्ति। प्रायशः तदनुसारेण एव कारिकाणाम् अध्ययनं क्रियमाणम् अस्ति। पङ्क्त्युन्नयनपद्धतिः अत्र बहुशः समादृतास्ति। किञ्च प्रत्येकं सन्दर्भस्य ऐदंपर्यं निर्णेतुं तात्पर्यग्राहकलिङ्गानि विमृश्यन्ते। किन्तु तदर्थं भगवत्पादैः संसूचिता विधा अनुस्रियते। श्रीमच्छङ्करभगवत्पादाः वेदान्तानां भाष्यं प्रणिन्युः । तैः उपनिषदर्थः कथम् अधिगतः इति ते स्वयं तैत्तिरीयोपनिषद्भाष्यादौ वर्णयन्ति – यैरिमे गुरुभिः पूर्वं पदवाक्यप्रमाणतः । व्याख्याताः सर्ववेदान्ताः तान् नित्यं प्रणतोऽस्म्यहम्।। किञ्च ईक्षत्यधिकरणभाष्ये भगवत्पादैः प्रतिपादितम् – तत्र

पदवाक्यप्रमाणज्ञेन आचार्येण वेदान्तवाक्यानां ब्रह्मावगतिपरत्वदर्शनाय वाक्याभासयुक्त्याभासप्रतिपत्तयः पूर्वपक्षीकृत्य निराक्रियन्ते – इति । तस्मात् वेदान्तनयनिरूपणे अस्ति उपयोगः शास्त्रान्तरसमयानाम्। अतस्तेऽपि परिशील्यन्ते।तथा च इह यथापरंपरं साम्प्रदायिकं समीक्षणं विधीयते। एतत्समीक्षात्मकाध्ययनाय कारिकाभिः सह श्रीबालकृष्णानन्दसरस्वतीविरचिता किरणावली अपि उपजीव्यते। सपरिकरं विचाराः अत्र उपस्थापनीयाः इत्यतः यस्य निरूपणे यः अपेक्षितः सः सर्वोऽपि अत्र सङ्ग्राह्यः भवति। अतः अन्येषाम् अपि प्रकरणग्रन्थानां अध्ययनं क्रियमाणं विद्यते। पूर्वोक्तानां ग्रन्थानां मुद्रणावसरे विद्वद्भिः संरच्य संयोजिताः टिप्पण्यः अपि समीक्षणावसरे महान्तम् उपकारं कुर्वन्ति। अतस्ताः अपि अवलम्ब्यन्ते।

७. <u>अस्य समीक्षात्मकस्य अध्ययनस्य प्रयोजनम्</u> -

स्वमतिविमलतायै एतद्ग्रन्थाध्ययने प्रवृत्ता अहम्। अतस्तदेव मुख्यं प्रयोजनम्। सम्प्रति न्यायमञ्जरीकाराणां सूक्तिः स्मृतिपथम् आयाति – कुतो वा नूतनं वस्तु वयम् उत्प्रेक्षितुं क्षमाः। वचोविन्यासवैचित्र्यमात्रम् अत्र विचार्यताम् – इति। अध्ययनावसरे बहवो ग्रन्थाः परिशील्यमानाः सन्ति। ततः तत्तद्ग्रन्थकर्तुः शैल्याः परिचयो जायमानः अस्ति। रत्नपञ्चकनाम्ना प्रथितः स्तोत्रात्मकः निबन्धः लघुरपि सन् बह्वर्थभरितो भवति इति ईषत् अवगम्यमानं वर्तते। स्वमतस्थापनं परमतनिराकरणं च अनुद्वेगकरैः वचनैः कथं कर्तव्यम् इत्यपि ज्ञायमानम् अस्ति। परमतनिरासाय एतादृशी अनुद्वेगकरी रीतिः आधुनिके कालेऽपि अपेक्षिता अस्ति। एवञ्च अयं प्रयत्नः आत्मंभरितां भावयितुं भविष्यति इति भावयामि। नैष्कर्म्यसिद्धिकाराः अपि आहुः – न ख्यातिलाभपूजार्थं ग्रन्थोऽस्माभिरुदीर्यते। स्वबोधपरिशुद्ध्यर्थं ब्रह्मविन्निकषाश्मसु॥ - इति। किञ्च 'मोक्षशास्त्रापरनामधेयस्य वेदान्तदर्शनस्य कर्मकाण्डेन सह सम्बन्धः नास्त्येव' 'शङ्कराचार्याः कर्मणां निन्दां चक्रुः' इति या आधुनिकानां शास्त्रतात्पर्यपरिज्ञानशून्यानां भणितिः, तस्याः सोपपत्ति निरासाय इह यत्नो विधीयते।

पूर्वमीमांसाशास्त्रमेव उपजीव्य कर्मोपासनाकाण्डरूपाणां श्रुतीनां तत्त्वमस्यादिमहावाक्योपकारकत्वं प्रदर्श्यते। तस्मात् शोधप्रबन्धोऽयं शास्त्रान्तरसम्बद्धोऽपि भविष्यति इति मे प्रतिभाति।

८. अस्य संशोधनस्य व्याप्तिः मर्यादा च -

तत्र तावत् भगवत्पादैः विरचिते उपदेशपञ्चके पञ्च रत्नभूतानि पद्यानि विलसन्ति। प्रत्येकं रत्नम् अधिकृत्य श्रीसदाशिवयतिना कारिकाः काश्चन सङ्ग्रथिताः सन्ति। आहत्य इह २१५ कारिकाः समुपलभ्यन्ते। प्रथमं श्लोकम् अधिकृत्य ४३ कारिकाः विरचिताः। द्वितीयस्य तु श्लोकस्य २६ कारिकाः भवन्ति। ४२ कारिकाः उपनिबद्धाः तृतीये श्लोके। चतुर्थश्लोकार्थः ३७ कारिकाभिः स्फुटं प्रकाशितः। सन्ति ६७ कारिकाः पञ्चमस्य पद्यस्य। सर्वाः इमाः कारिकाः शोधप्रबन्धेऽस्मिन् समीक्ष्यन्ते। तत्परिपूरकत्वेन सोपानपञ्चकस्य अन्याष्टीकाः अपि विमृश्यन्ते। किञ्च पूर्वोक्तरीत्या सर्वोऽपि प्रमेयविशेषः पदवाक्यप्रमाणशः एव निरूप्यते। तदर्थमेव च विशेषेण तत्तच्छास्त्राणां प्रकरणग्रन्थाः अवलम्ब्यन्ते।

९. शोधप्रबन्धस्य अध्यायविभागः –

१. उपोद्घातः

२. प्रथमोऽध्यायः – प्रथमरत्नकारिकाणां समीक्षात्मकम् अध्ययनम्।

३. द्वितीयोऽध्यायः – द्वितीयरत्नकारिकाणां समीक्षात्मकम् अध्ययनम्।

४. तृतीयोऽध्यायः – तृतीयरत्नकारिकाणां समीक्षात्मकम् अध्ययनम्।

५. चतुर्थोऽध्यायः – चतुर्थरत्नकारिकाणां समीक्षात्मकम् अध्ययनम्।

६. पञ्चमोऽध्यायः – पञ्चमरत्नकारिकाणां समीक्षात्मकम् अध्ययनम्।

७. उपसंहारः

८. परिशिष्टम्

प्रत्यध्यायम् उपस्थाप्यमानाः प्रधानाः विषयाः

१. उपोद्घातः –

इह तावत् वेदान्तशास्त्रस्य सामान्यः परिचयः , सङ्क्षेपेण प्रस्थानभेदनिरूपणं, प्रकरणग्रन्थानां शैली महत्त्वं च, श्रीमच्छङ्करभगवत्पादानां शास्त्रेषु अनितरसाधारणं योगदानं, तत्प्रणीतानि प्रकरणानि, पञ्चरत्नाख्यस्य लघुनिबन्धस्य वैशिष्ट्यं, पञ्चरत्नकारिकावल्याः सामान्यतः परिचयः , तत्प्रणेतुः सदाशिवयतेः वैदुष्यं, कारिकाणां स्वरूपं वैशिष्ट्यं च, वेदान्तनयनिरूपणे पूर्वमीमांसाशास्त्रसमयानाम् उपकारकत्वम् इत्येते विषयाः पुर्वोत्तरमीमांसाशास्त्रदृष्ट्या प्राधान्येन उपस्थाप्यन्ते।

२. प्रथमोऽध्यायः – प्रथमरत्नकारिकाणां समीक्षात्मकम् अध्ययनम्।

अध्यायेऽस्मिने मङ्गलाचरणं, अनुबन्धचतुष्टयं, स्वाध्यायविधिः, श्रवणादीनि ज्ञानसाधनानि, प्रवृत्तिलक्षणः निवृत्तिलक्षणश्चेति द्विविधो वेदोक्तो धर्मः, श्रवणविधिविचारः, कर्मभेदः , संन्यासस्वरूपम् इत्येते विषयाः पुर्वोत्तरमीमांसाशास्त्रदृष्ट्या प्राधान्येन विचार्यन्ते।

३. द्वितीयोऽध्यायः – द्वितीयरत्नकारिकाणां समीक्षात्मकम् अध्ययनम्।

इह अध्याये तु सत्सङ्गफलं, भगवद्भक्तेः यथावत् स्वरूपं, गुरूपसदनविधिः, गुरोः महिमा, शिष्यकर्तृकाः प्रश्नाः, महावाक्यार्थः , शाब्दापरोक्षवादः इतीमे विषयाः प्रामुख्येन समीक्ष्यन्ते।

४. तृतीयोऽध्यायः – तृतीयरत्नकारिकाणां समीक्षात्मकम् अध्ययनम्।

अत्र हि तत्त्वंपदयोः अर्थः , लक्षणात्रैविध्यं, भागत्यागलक्षणा, महावाक्यचतुष्टयं, वेदान्तानाम् अद्वितीये ब्रह्मणि परमतात्पर्यं, तर्कस्य अप्रतिष्ठितत्वं, श्रुतिमूलकस्य तर्कस्य उपादेयत्वं, अहं ब्रह्मास्मि इति अनुसंधानविधिः, गर्वस्य ज्ञानप्रतिबन्धकत्वं, देहात्मबुद्धेः तिरस्करणम् इत्येते विषयाः पुर्वोत्तरमीमांसाशास्त्रदृष्ट्या विस्तरेण उपपाद्यन्ते।

५. चतुर्थोऽध्यायः – चतुर्थरत्नकारिकाणां समीक्षात्मकम् अध्ययनम्।

तुरीयेऽस्मिन् अध्याये संन्यासिनां भिक्षाचर्यं, तुरीयाश्रयनियमाः, शमदमादयः, मौनविधिः इत्येते विषयाः पुर्वोत्तरमीमांसाशास्त्रदृष्ट्या यथामति प्रतिपाद्यन्ते।

६. पञ्चमोऽध्यायः – पञ्चमरत्नकारिकाणां समीक्षात्मकम् अध्ययनम्।

अस्मिन् अन्तिमेऽध्याये एकान्तवासमहत्ता, ब्रह्मणि चेतस्समाधिः, आत्मनः पूर्णत्वं, दृश्यस्य प्रपञ्चस्य मिथ्यात्वं, सत्तात्रैविध्यं, ज्ञानाग्निदग्धकर्मत्वं, जीवन्मुक्तिः , विदेहमुक्तिश्चेति बहवो विषयाः पुर्वोत्तरमीमांसाशास्त्रदृष्ट्या प्राधान्येन समीक्षिताः भविष्यन्ति।

७. उपसंहारः

शोधप्रबन्धे पञ्चसु अध्यायेषु प्रतिपादिताः विषयाः साररूपेण अत्र उल्लेखिष्यन्ते।

८. परिशिष्टम्

१०. अनुशीलितग्रन्थसूची -

प्राचीनग्रन्थाः –

१. श्रीशङ्करभगवत्पादाचार्यविरचिता **“प्रकरणद्वादशी”** प्राचीनाचार्याः विरचितटीकाभिः समलङ्कृता, श्रीदक्षिणामूर्ति मठ प्रकाशनम्.

२. सदानन्दयतिकृत- **“वेदान्तसारः”**, सम्पादकः – पं.श्रीरामगोविन्दशुक्लः , भारतीयविद्याप्रकाशनम् , वाराणसी , १९९०.

३. धर्मराजाध्वरीन्द्रप्रणीता **“वेदान्तपरिभाषा”** , सम्पादकः विश्वनाथ धिताल, श्रीदक्षिणामूर्तिमठ-प्रकाशनम् , वाराणसी, २००८.

४. श्रीमद्विद्यारण्यमुनिप्रणीता **“पञ्चदशी”** रामकृष्णकृतया व्याख्यया सहिता, सम्पादकः नारायणदास आचार्य, चौखम्बा संस्कृत प्रतिष्ठान , दिल्ली, २००८.

५. श्रीमच्छङ्करभगवत्पादाचार्यविरचितम् **“उपनिषद्भाष्यम्”** , सम्पादकः पण्डितराजशास्त्ररत्नाकरादि-पदभाजः एस् . सुब्रह्मण्यशास्त्रिणः , महेश-अनुसन्धान-संस्थानम् , वाराणसी , १९७९.

६. **“श्रीमद्भगवद्गीता”**, सम्पादक – श्रीकृष्णपन्तशास्त्री, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २००८.

७. शङ्कराचार्यप्रणीत- **“विवेकचूडामणिः”**, अभिनवविद्यातीर्थविद्यानिधिः, श्रीशारदापीठम् , श्रृङ्गेरी , १९८२.

८. श्रीमदप्पय्यदीक्षितेन्द्रप्रणीतः **“शास्त्रसिद्धान्तलेशसङ्ग्रहः”** , सम्पादकः प्रो. पारसनाथद्विवेदी , सह-सम्पादकः डा.ददन उपाध्यायः , सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः , वाराणसी , २००५.

९. **“ब्रह्मसूत्रशाङ्करभाष्यम्”**, श्रीरामानन्दकृतया भाष्यरत्नप्रभया श्रीवाचस्पतिमिश्रविरचितया भामत्या श्रीमदानन्दगिरिप्रणीतेन न्यायनिर्णयेन च समुपेतम्, सम्पादकः आचार्यजगदीशशास्त्री, मोतीलाल बनारसीदास, १९८०.

१०. दीक्षितः, रामनाथ, **“मीमांसान्यायप्रकाशः” (आपदेव)**, चिन्नस्वामिशास्त्रिणा कृतया सारविवेचिन्याख्यया व्याख्यया संवलितः, चौखम्भा संस्कृत संस्थान, वाराणसी, १९८१.

११. श्रीलौगाक्षिभास्करप्रणीतः **“अर्थसङ्ग्रहः”.**

१२. श्रीपद्मपादाचार्यविरचिता **“पञ्चपादिका”** विवरणसहिता , सम्पादकः पण्डितराजशास्त्ररत्नाकरादि-पदभाजः एस् . सुब्रह्मण्यशास्त्रिणः , श्रीदक्षिणामूर्तिमठप्रकाशनम् , वाराणसी , २००९.

१३.**“ईशादि नौ उपनिषत्**”, गीताप्रेस, गोरखपुर, १९९९.

१४. “संक्षिप्त योगवासिष्ठ”, गीताप्रेस, गोरखपूर.

१५.“अष्टावक्रगीता” भाषा-टीका सहित, रायबहादुर बाबू जालिमसिंह, तेजकुमार प्रेस, बुकडिपो, लखनऊ.

अर्वाचीनग्रन्थाः / शोधपत्रिकाः –

१. **“शाङ्करदर्शनमर्मप्रकाशः”,** कृष्णजोयिस्, सम्पादकः एम्. एल्. नरसिंहमूर्ति, राष्ट्रियसंस्कृतविद्यापीठम्, १९९६.

२. **“संस्कृतवाङ्मय का बृहद् इतिहास”**, दशम खण्ड, प्रधान सम्पादक पद्मभूषण आचार्य श्री बलदेव उपाध्याय, सम्पादक प्रो. संगमलाल पाण्डेय, उत्तर प्रदेश संस्कृत संस्थान, लखनऊ , १९९६.

३. श्रीनिवास हरि दीक्षित विरचित, “**भारतीय तत्त्वज्ञान**”, फडके प्रकाशन, कोल्हापूर.

४. “**स्वाध्याय मनोबोध**” – प्रवचनकार कै. माननीय दादासाहेब प्राणी.

५. Comans and Michael, “**The method of early Advaita Vedanta: A study of Gaudapada, Shankara, Suresvara, and Padmapada**”, Motilal Banarasidass, ISBN 978-81-208-1722-7.

६. Nagesh Sonde, “**Shri Shankaracharya Sadhana Panchakam**”, New Age Publication.

७. S. Yegnasubramaniyam, “**Upadesh Panchakam of Adi Shankaracharya**”, Part I, II and III.

८. K. Kathirasan, “**Sadhana Panchakam: A systematic text for aspirants of Spiritual Libaration**”, A Thesis under the supervision of Prof. Narada Kush (Dutch University College).

९. “**Sadhana Panchakam: The Rationale of Sadhana**”, 24 talks by Swami Gurubhaktanand (Based on 25 Lectures of Swami Adwayanand).

- **अभ्यर्थना –**

“श्रीसदाशिवविरचिताः पञ्चरत्नकारिकायाः समीक्षात्मकम् अध्ययनम्।” इति इदम् अनुसन्धानं दर्शनशास्त्रे नूतनतत्त्वान्वेषणे उपयुक्तं भवति। ईदृशम् अनुसंधानं न केनापि इतः पूर्वं विहितम्। प्रा.डा.सी.जी. विजयकुमारमहोदयानां मार्गदर्शने करिष्यमाणाय एतस्मै अनुसन्धानाय अनुमतिं प्रदाय मामनुगृह्णन्त्विति प्रार्थ्यते।

मार्गदर्शकाः अनुसन्धित्सुः

आचार्य. सी. जी. विजयकुमारः श्रद्धा पराग देवपुजारी

कुलपतिः

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः

उज्जयिनी, मध्यप्रदेशः